हिमाद्रनशनात्तथा निधुवनाच्च धातुक्षयात्
मलादिरपधारणात् मदनशोकचिन्ताभयैः ।
अतिक्षतजमोक्षणात् गदकृतातिमांसक्षया-
दतीव वमनाद्भ्रमादतिविरेचनादामतः ।
पयोदसमये दिनक्षणदयोस्तृतीयांशयो-
र्जरामतिगतेऽपि ते शिशिरसंज्ञकालेऽपि च ।
देहे स्रोतांसि रिक्तानि पूरयित्वानिलो बली ।
करोति विविधान् रोगान् सर्व्वाङ्गैकाङ्गसंश्र-
यान् ।”
प्रमितत्वाच्च वैपरीत्ये प्रोपसर्गस्तेन अपरिमित-
मित्यर्थः । प्रकर्षेण मितमत्यल्पं यः लघ्वन्न-
मतिपुरातनं शाल्यादि । कतिचिदन्नानि नवा-
न्यपि वातलानि । यत आह । गुणरत्नमाला-
याम् ।
नीवारस्त्रिपुटः सतीनचणकश्यामाकमुद्गाढ़की-
निष्पावाश्च मकुष्टकश्च वरटा मङ्गल्यकः
कोद्रवः ।
एते वातकरा इति शेषः । नीवारः प्रसाधिका
तीनी इति लोके । त्रिपुटः खेसारी । सतीनः
कलायः । निष्पावो राजमाषः । बोड़ा इति
लोके । मकुष्टकः मोड़ः इति लोके । वरटा
वरटिका वरे इति लोके । मङ्गल्यकः मसूरी
इति लोके । पुरःपवनः प्राग्वातः । आमतः
आमेन मार्गावरणात् । यत उक्तम् ।
वायोर्धातुक्षयात् कोपो मार्गस्यावरणेन चेति ।
पयोदसमये वर्षासु । जरामतिगतेऽपि सुक्ते-
ऽतीव जीर्णताङ्गते । देहे स्रोतांसीत्यादिना
संप्राप्तिरुक्ता । कषायादिभिर्हेतुभिर्वर्षादौ
समये हेतुभूते बली अनिलः प्रवृद्धो वायुः
करोति विविधान् रोगान् । ते रोगाः कथ्यन्ते ।
“शिरोग्रहोऽर्दितकेशत्वं जृम्भार्थं हनुग्रहः ।
जिह्वास्तम्भो गद्गदत्वं मिन्मिनत्वञ्च मूकता ।
वाचालता प्रलापश्च रसानामनभिज्ञता ।
बाधिर्य्यं कर्णनादश्च खर्ज्जत्वं तथार्द्दितम् ।
मन्यास्तम्भोऽत्र गम्रितो बाहुशोषोपबाहुकः ।
चर्व्विता चैव विश्वाची ऊर्द्धवात उदीरितः ।
आध्मानञ्च प्रत्याध्मानं वाताष्ठीला प्रत्यष्ठीला ।
तूणी च प्रतितूणी च वह्निवैषम्यमेव च ।
आटोपः पार्श्वशूलञ्च त्रिकशूलं तथैव च ।
मुहुश्च मूत्रलं मूत्रनिग्रहो मलगाढ़ता ।
पुरीषस्याप्रवृत्तिश्च गृध्रसी च ततः परः ।
कलायखञ्जता चापि खञ्जता पङ्गुता तथा ।
क्रोष्टुशीर्षककल्यौ च वातकण्टक एव च ।
पादहर्षः पाददाहः आक्षेपो दण्डकाभिधः ।
वातपित्तकृताक्षेपस्तथा दण्डापतानकः ।
अभिघातकृताक्षेप आयामो द्विविधः स्मृतः ।
आन्तरश्च तथा बाह्यो धनुर्वातश्च कुब्जकः ।
अपतन्त्रोपतानश्च पक्षाघातोऽखिलाङ्गकः ।
कम्पः स्तम्भो व्यथा तोदो भेदश्च स्फुरणं तथा ।
रौक्ष्यं कार्श्यञ्च कार्ष्णञ्च शैत्यं लोम्नाञ्च हर्ष-
णम् ।
अङ्गमर्द्दोऽङ्गविभ्रंशः शिराशङ्कोच एव च ।
अङ्गशोषश्च भीरुत्वं मोहश्चञ्चलचित्तता ।
निद्रानाशः स्वेदनाशो बलहानिस्तथैव च ।
शुक्रक्षयो रजोनाशो गर्भनाशः परिश्रमः ।
एत एवाशीतिसंख्या रोगा योगेन रूढ़ितः ।
वातव्याधीति नामानो मुनिभिः परि-
कीर्त्तिताः ।”
रत एव शिरोग्रहादय एव । योगेन वातेन ।
वाताद्वा व्याधिर्व्वातव्याधिरिति निरुक्त्या तदा
वातज्वरादिष्वपि प्रसङ्गः स्यादत आह
रूढ़ितः प्रसिद्धितः । शिरोग्रहादयोऽशीतिरेव
वातव्याधिसंज्ञा प्रसिद्धा न तु वातज्वरादयः ॥ * ॥
अथ वातव्याधिनां सामान्यचिकित्सामाह ।
“मधुरलवणसाम्लस्निग्धनस्योष्णनिद्रा
गुरुरविकरवस्तिस्वेदसन्तर्पणानि ।
दहनजलदवैकाभ्यङ्गसंमर्द्दनानि
प्रकुपितपवमानं शान्तमेतानि कुर्य्युः ।”
इति भावप्रकाशः ॥ * ॥
अपि च ।
“बलपुष्टिकराण्येव वायुबीजं निशामय ।
भोजनानन्तरं सद्यो गमनं धावनं तथा ।
छेदनं वह्नितापञ्च शश्वद्भ्रमणमैथुनम् ।
वृद्धस्त्रीगमनञ्चैव मनःसन्ताप एव च ।
अतिरूक्षमनाहारं युद्धं कलह एव च ।
कटुवाक्यं भयं शोकः केवलं वायुकारणम् ।
आश्राक्षपक्वे तज्जन्म निशामय तदौषधम् ।
पक्वरम्भाफलञ्चैव सवीजं शर्करोदकम् ।
नारिकेलोदकञ्चैव सद्यस्तक्रं सुमिष्टकम् ।
माहिषन्दधि मिष्टञ्च केवलं वा सशर्करम् ।
सद्यःपर्य्युषितान्नञ्च सौवीरं शीतलोदकम् ।
पक्वतैलविशेषञ्च तिलतैलञ्च केवलम् ।
लाङ्गलीतालखर्ज्जूरमस्तमामलकोद्भवम् ।
शीतलोष्णोदकस्नानं सुस्निग्धचन्दनद्रवम् ।
स्निग्धपद्मपत्रतल्पं सुस्निग्धव्यजनानिलम् ।
एतत्ते कथितं वत्से सद्यो वातप्रणाशनम् ।
वायवस्त्रिविधाः पुंसां क्लेशसन्तापकामजाः ।”
इति श्रीब्रह्मवैवर्त्ते ब्रह्मखण्डे १६ अध्यायः ॥ * ॥
अन्यच्च ।
“बिल्वाग्निमन्थश्योनाकपाटलापारिभद्रकम् ।
प्रसारण्यश्वगन्धा च बृहती कण्टकारिका ।
बला चातिबला रास्ना श्वदंष्ट्रा च पुनर्नवा ।
एरण्डशारिवा पर्णी गुडूचीकपिकच्छुवः ।
एषां दशपलिकान् भागान् क्वाथयेत् सलिले-
ऽम्बले ।
तेन पादावशेषेण तैलं पात्रे विपाचयेत् ।
आजं वा यदि वा गव्यं क्षीरं दत्त्वा चतुर्गुणम् ।
शतावरीरसञ्चैव तैलतुल्यं प्रदापयेत् । * ।
द्रव्याणि यानि पेष्याणि तानि वक्ष्यामि
तच्छृणु ।
शतपुष्पा देवदारु शालपर्णी वचागुरुः ।
कुष्ठमांसी सैन्धवञ्च पलमेकं पुनर्नवा ।
पाने नस्ये तथाभ्यङ्गे तैलमेतत् प्रदापयेत् ।
कुक्षिशूलं पार्श्वशूलञ्च गण्डमालाञ्च नाशयेत् ।
अपस्मारं वातरक्तमायुष्मांश्च पुमान् भवेत् ।
गर्भमश्वतरी विन्द्यात् किं पुनर्मानुषी शिव ।
अश्वानां वातभग्नानां कुञ्जराणां नृणां तथा ।
तैलमेतत् प्रदातव्यं सर्व्ववातविकारिणाम् ।”
पुनश्च ।
“पलद्वयं सैन्धवञ्च शुण्ठी चित्रकपञ्चकम् ।
पञ्चप्रस्थं त्वारनालं तैलप्रस्थं पचेत्ततः ।
ग्रहग्रह्मप्रवशीहसर्व्ववातविकारनुत् ।”
इति गारुडे १६८ अध्यायः ॥
(तथास्य गुणादयः ।
“वातस्तु रूक्षलघुचलबहुशीघ्रशीतपरुषविषदा-
स्तस्य रौक्ष्याद्वातला रूक्षा अपचिताल्पशरीराः
प्रततरूक्षक्षामभिन्नसक्तजर्ज्जरस्वराः जागरू-
काश्च लघुत्वाच्च लघुचपलगतिचेष्टाहारव्यव-
हाराः चलत्वादनवस्थितसन्ध्यक्षिभ्रूहन्वोष्ठजिह्वा
शिरःस्कन्धपाणिपादाः बहुत्वाद्बहुप्रलापकण्डरा
सिराप्रतानाः शीघ्रत्वात् शीघ्रसमारम्भक्षोभ-
विकाराः शीघ्रोत्त्रासरागविरागाः श्रुत-
ग्राहिणोऽल्पस्मृतयश्च शैत्यात् शीतासहिष्णवः
प्रततशीतकोद्वेपकस्तम्भाः पारुष्यात् परुष-
केशश्मश्रुरोमनखदशनवदनपाणिपादाङ्गा वैश-
द्यात् स्फुटिताङ्गावयवाः सततसन्धिशब्दगामिनः
त एवं गुणयोगात् वातलाः प्रायेणाल्पबला-
श्चाल्पायुषश्चाल्पापत्याश्चाल्पसाधनाश्चाधन्याश्च ।”
इति चरके विमानस्थानेऽष्टमेऽध्याये । अथास्य
वृद्धिक्षयलक्षणं यथा ।
“तत्र वातवृद्धौ त्वक् पारुष्यं कार्श्यं कार्ष्ण्यं
गात्रस्फुरणमुष्णकामिता निद्रानाशोऽल्पबलत्वं
गाढ़वर्च्चस्त्वञ्च ।”
“तत्र वातक्षये मन्दचेष्टताल्पवाक्त्वमल्पहर्षो
मूढ़संज्ञा च ।” इति सुश्रुते सूत्रस्थाने पञ्च-
दशेऽध्याये । * । स्थानविशेषेऽवस्थितस्यास्य
चिकित्सा यथा,—
“विशेषतस्तु कोष्ठस्थे वाते क्षारं पिबेन्नरः ।
आमाशयस्थे शुद्धस्य यथा दोषहरी क्रिया ।
आमाशयगते वाते छर्द्दिताय यथाक्रमम् ।
देयः षड्धरणो योगः सप्तरात्रं सुखाम्बुना ।”
“पक्वाशयगते वाते हितं स्नेहविरेचनम् ।
वस्तयः शोधनीयाश्च प्राशाश्च लवणोत्तराः ।”
स्नेहलवणम् ।
“स्नुहीलवणवार्त्ताकुस्नेहान् छन्ने घटे दहेत् ।
गोमयैः स्नेहलवणं तत्परं वातनाशनम् ।
कार्य्यो वस्तिगते चापि विधिर्वस्तिविशोधनः ।
त्वङ्मांसासृक्शिरा प्राप्ते कुर्य्याच्चासृग्
विमोक्षणम् ।
स्नेहोपनाहाग्निकर्म्मबन्धनोन्मर्द्दनानि च ।
स्नायुसन्ध्यस्थि संप्राप्ते कुर्य्याद्वाते विचक्षणः ।
स्वेदाभ्यङ्गावगाहांश्च हृद्यञ्चान्नञ्च गात्रिते ।
शीताः प्रदेहा रक्तस्थे विरेको रक्तमोक्षणम् ।
विरेको मांसमेदःस्थे निरूहाः शमनानि च ।
बाह्याभ्यन्तरतः स्नेहैरस्थिमज्जगतं जयेत् ।
हर्षोऽन्नपानं शुक्रस्थे बलशुक्रकरं हितम् ।